Shri Raghunath Temple MSS. Library,
JAMMU

No. १६०१

Title भाषा परिच्छेदः

Author विश्वनाथ पञ्चाननः

Extent ११ Age ×

Subject न्याय वैशेषिकं

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

भाषापरिच्छेदः
कारिकावली वा
१६०१

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

दिक्जातिस्तु परापरतयोच्यते ९ व्यापकत्वात्परापि स्यात्व्याप्यत्वादपरापि च अन्त्योनित्यद्रव्यवृत्तिर्विशेषः परिकीर्त्तितः १० घटादीनां
कपालादौ द्रव्येषु गुणकर्मणोः तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ११ अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः प्रागभावस्त
थाध्वंसोप्यत्यन्ताभाव एव च १२ एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते १३ द्रव्यादयः प
ञ्चभावा अनेके समवायिनः सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः १४ सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः पारिमाण्ड
ल्यभिन्नानां कारणत्वमुदाहृतम् १५ अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम् १६ स
मवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम् एवं न्यायनयज्ञैस्तु तृतीयमुक्तं निमित्तहेतुत्वम् १७ यत्समवेतं कार्यं भवति ज्ञेयं तु स

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

का॰ का॰ स्मा॰ समवायिजनकं तत् तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् १८ येन सह पूर्वभावः कारणमादाय वा यस्य अन्यं प्रति पूर्वभावे ज्ञा
ते यत्पूर्वभावविज्ञानम् १९ जनकं प्रति पूर्ववर्तितामपरिज्ञाय यस्य गृह्यते अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्ववर्त्ति
नः २० एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम् घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् २१ तृतीयं तु भवेद्व्योम कुला
लजनकोऽपरः पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ २२ समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् गुणकर्ममात्रवृ
त्ति ज्ञेयमथाप्यसमवायिहेतुत्वम् २३ अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगि
ता २४ क्षितिर्जलं तथा तेजः पवनो मन एव च परापरत्वमूर्तत्वक्रियावेगाश्रया अमी २५ कालखात्मदिशां सर्वगतत्वपर

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

मंमहत् क्षित्यादिपञ्चभूतानि चत्वारि स्पर्शवन्ति हि २६ द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरिणाम् अव्याप्यवृत्तिः क्षणिको विशेष
गुण इष्यते २७ रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः २८ आत्मनो भूतवर्गस्य विशेषगु
णयोगिनः यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् २९ स्पर्शादयोऽष्टौ वेगाख्यसंस्कारो मरुतो गुणाः स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो
गुणाः ३० स्पर्शाद्यष्टौ वेगाख्यद्रवत्वं च गुरुत्वकम् रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ३१ स्नेहहीना गन्धयुक्ताः क्षितावेते चतुर्दश बुद्ध्या
दिषट्कं संख्यादिपञ्चकं भावना तथा ३२ धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश संख्यादिपञ्चकं कालदिशोः शब्दश्च ते खे ३३ सं
ख्यादिपः पंच बुद्धिरिच्छा यत्नोऽपि चेश्वरे परापरत्वे संख्यादिपंच वेगश्च मानसे ३ तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता षड्विधस्तु

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

क॰ का॰ मा॰ रसस्तत्र गंधस्तु द्विविधो मतः ३५ स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा ३६ अनित्या तु तदन्या स्यात्सैवावयवयोगिनी सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ३७ योनिजादि भवेद्देहमिन्द्रियं घ्राणलक्षणम् विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः ३८ वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम् ३९ नित्यादि पूर्ववत्किन्तु देहमयोनिजम् इंद्रियं रसनं सिन्धुर्हिमादिर्विषयो मतः ४० स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम् नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत् ४१ इन्द्रियं नयनं वह्निः स्वर्णादिर्विषयो मतः अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः ४२ तिर्यग्गमनवानेषः ज्ञेयः स्पर्शादिलिंगकः पूर्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ४३ प्राणादिस्तु महा

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

वायुःपर्यन्तो विषयो मतः आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ४४ इन्द्रियं तद्भवेच्छ्रोत्रमेकः सन्नप्युपाधितः जन्यानां जनकः
कालो जगतामाश्रयो मतः ४५ परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ४६ उपाधिभेदा
देकापि प्राच्यादिव्यपदेशभाक् आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ४७ शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः तथात्वं
चेदिन्द्रियाणामुपघाते कथं स्मृतिः ४८ मनोपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् धर्माधर्माश्रयोध्यक्षो विशेषगुणयोगतः
४९ प्रवृत्त्याद्यनुमेयोयं रथगत्येव सारथिः अहंकारस्याश्रयोयं मनोमात्रस्य गोचरः विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा म
ताऽनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा ५१ प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे घ्राणजादिप्रभेदेन प्रत्यक्षं षड्वि

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

५ ४

का॰ का॰ व्या॰ धं मतम् ५२ घ्राणस्य गोचरो गन्धो गन्धत्वादिरपिष्यतेः तथा रसो रसज्ञायास्तथा शब्दोपि च श्रुतेः ५३ उद्भूतरूपं नयनस्य गोचरो
द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये विभागसंयोगपरापरत्वे स्नेहद्रवत्वपरिमाणवेगौ ५४ क्रियाजातियोग्यवृत्तिस्समवायश्च ता
दृशः ग्रह्णाति चक्षुः संबन्धादालोकोद्भूतरूपयो ५५ उद्भूतस्पर्शवद्द्रव्यं गोचरः सोपि च त्वचः रूपान्यच्चक्षुषो योग्यं रूपमत्रापि का
रणम् ५६ द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम् मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ५७ ज्ञानं यन्निर्विकल्पा
ख्यं तदतीन्द्रियमिष्यते महत्त्वं षड्विधे हेतुरिन्द्रियं करणम्मतम् ५८ विषयेन्द्रियसंबन्धो व्यापारः सोपि षड्विधः द्रव्यग्रहस्तु
संयोगात्संयुक्तसमवायतः ५९ द्रव्येषु समवेतानां तद्वत्तत्समवायतः तत्रापि समवेतानां शब्दस्य समवायतः ६० तद्वृत्तीनां

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

समवेतसमवेतानां ग्रहविशेषणतया तद्वद्दृश्याभावग्रहो भवेत् ६१ यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते प्रत्यक्षं समवा
यस्य विशेषणतया भवेत् ६२ अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा
६३ आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ६४ विषयी यस्य तस्यैव व्यापा
रो ज्ञानलक्षणः योगजो द्विविधः प्रोक्तो युक्तयुंजानभेदतः ६५ युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः व्यापारस्तु परामर्शः क
रणं व्याप्तिधीर्भवेत् ६६ अनुमाने ज्ञायमानं लिंगं तु करणं नहि अनागतादिलिङ्गेन न स्यादनुमितिस्तदा ६७ व्याप्यस्य पक्ष
वृत्तित्वधीः परामर्श उच्यते व्याप्तिः साध्यवदन्यस्मिन्नसंबन्ध उदाहृतः ६८ अथवा हेतुमन्निष्ठविरहाप्रतियोगिना साध्येन हे

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

का·का·मा· तोरैकाधिकरण्यं माश्रित्य सते ६९ सिषाधयिषयासत्त्वासिद्धिर्यत्र न तिष्ठति सपक्षस्तत्र वृत्तित्वस्यानादरान्मितिर्भवेत् ७० अ
नैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः कालात्ययापदिष्टश्च हेत्वाभासाश्च पंचधा ७१ आद्यस्साधारणस्तु स्यादसाधारणको
परः तथैवानुपसंहारी त्रिधानैकान्तिको भवेत् ७२ यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः यस्तूभयस्माद्व्यावृत्तः स त्व
साधारणो मतः ७३ तथैवानुपसंहारी केवलान्वयिपक्षकः यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ७४ आश्रयासिद्धि
राद्यास्यात्स्वरूपासिद्धिरप्यथ आप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ७५ पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः
ह्रदो द्रव्यं धूमवत्वात्त्रासिद्धिरथापरा ७६ आप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् विरुद्धयोः परामर्शे हेत्वोः सत्प्रति

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

पक्षिता ७७ साध्यस्योपनय पक्षस्तस्मै वा धाउदाहृतः उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ७८ इत्यनुमानम् ग्रामी
णस्य प्रथमतः पश्यतो गवयादिकम् सादृश्यधीर्गवादीनां या स्यात्सा करणं मतम् ७९ वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते ग
वयादिपदानां तु शक्तिधीरुपमाफलम् ८० अथ शाब्दः पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः शाब्दबोधः फलं तत्र शक्तिधीः सहका
रिणी ८१ लक्षणा शक्यसंबन्धस्तात्पर्यानुपपत्तितः आसत्तिर्योग्यताकांक्षातात्पर्यज्ञानमिष्यते ८२ कारणं सन्निधानं तु पदस्यास
त्तिरुच्यते पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ८३ यत्पदेन विना यस्याननुभावकता भवेत् आकांक्षा वक्तुरिच्छा तु तात्पर्यं प
रिकीर्तितम् ८४ साक्षात्कारे सुखादीनां करणं मन उच्यते अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते ८५ अथ द्रव्याश्रिता ज्ञेया

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

6 ६

का·का·मा· निर्गुणा निष्क्रिया गुणाः रूपं रसस्पर्शगन्धौ परत्वं वापरत्वकम् ८६ द्रवत्वं स्नेह वेगाश्च मता मूर्तगुणा अमी धर्माधर्मौ भावना च शब्द
बुद्ध्यादयोपि च ८७ एतेमूर्त्तगुणास्सर्वे विद्भिः परिकीर्त्तिताः संख्यादिश्च विभागान्त उभयेषां गुणो मतः ८८ संयोगश्च विभागश्च सं
ख्या द्वित्वादिकास्तथा द्विपृथक्त्वादयस्तद्वदेतेनेकाश्रिता गुणाः ८९ अतः शेषगुणाः सर्वे मता एकैकवृत्तयः बुद्ध्यादिषट्कं स्पर्शान्ताः
स्नेहः सांसिद्धिको द्रवः ९० अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः संख्यादिरपरत्वान्तो द्रवोसांसिद्धिकस्तथा ९१ गुरुत्ववेगौ
सामान्यगुणा एते प्रकीर्त्तिताः संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ९२ एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः बाह्यैकैकेन्द्रियग्रा
ह्या गुरुत्वादृष्टभावनाः ९३ अतीन्द्रिया विभूनां तु ये स्युर्वैशेषिका गुणाः अकारणगुणोत्पन्ना एते तु परिकीर्त्तिताः ९४ अपाकजा

६

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

स्तु स्पर्शान्ताद्द्रवत्वं च तथाविधम् स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम् ९५ स्थितिस्थापकमप्येते स्युः कारणगुणोद्भवाः संयोगश्च विभाग
श्च वेगश्चैते तु कर्मजाः ९६ स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके भवेदसमवायित्वमथ वैशेषिको गुणः ९७ आत्मनः स्या
न्निमित्तत्वमस्मस्पर्शगुरुत्वयोः वेगेपि च द्रवत्वे च संयोगादिद्वये तथा ९८ द्विधैव कारणत्वं स्यादथ वैशेषिको भवेत् वैशेषिको वि
भुगुणः संयोगादिद्वयं तथा ९९ चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम् चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा १०० जलादिप
रमाणौ तु नित्यमन्यत्सहेतुकम् रसोरसनाग्राह्यो मधुरादिरनेकधा १०१ सहकारी रसज्ञाया नित्यतादि च पूर्ववत् घ्राणग्राह्यो भ
वेद्गन्धो घ्राणस्यैवोपकारकः १०२ सौरभश्चासौरभश्च हि द्विविधः परिकीर्तितः स्पर्शस्त्वगिन्द्रियग्राह्योस्त्वचः स्यादुपकारकः १०३ अनु

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

का.का.भा. स्पर्शोऽनुष्णाशीतोष्णभेदात्स त्रिविधो मतः। काठिन्यादि क्षितावेव नित्यतादि च पूर्ववत् १०४ एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित् तत्रापि परमाणौ स्यात्पाको वैशेषिके नये १०५ नैयायिकानां तु नये द्व्यणुकादावपीष्यते गणनाव्यवहारे तु हेतुः संख्याभिधीयते १०६ नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः १०७ अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः अपेक्षाबुद्धिनाशाच्च तेषां नाशो निरूपितः १०८ अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरुच्यते परिमाणं भवेन्मानव्यवहारस्य कारणम् १०९ अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः अनित्ये तदनित्यं स्यान्नित्ये नित्यमिहेष्यते ११० संख्यातः परिमाणाच्च प्रचयादपि जायते अनित्ये द्व्यणुकादौ तु संख्याजन्यमुदाहृतम् १११ परिमाणं घटादौ तु परिमाणजमुच्यते प्रचयः शिथिलाख्यो यः संयोगस्

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

योगस्तेन जायते ११२ परिमाणं मूर्त्तैकाद्वौ ताशस्त्वाश्रयनाशतः संख्यावत्तु पृथक्त्वं स्यात्पृथक्प्रत्ययकारणम् ११३ अन्योन्याभावतो
नास्य चरिताथत्वमिष्यते अस्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा ११४ अप्राप्तयोस्तु या प्राप्तिः सैव संयोग इष्यते कीर्तित
स्त्रिविधस्त्वेषामाद्योन्यतरकर्मजः ११५ तथोभयस्पन्दजन्मा भवेत्संयोगजापरः आदिनाश्येनशैलादिसंयोगः परिकीर्तितः ११६
मेषयोः सन्निपातो यस्स द्वितीय उदाहृतः कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः ११७ तृतीयः स्यात्कर्मजोपि द्विविधः परिकीर्ति
तः अभिघातोनोदनं च शब्दहेतुरिहादिमः ११८ शब्दाहेतुर्द्वितीयः स्याद्विभागोपि त्रिधा भवेत् एककर्मोद्भवस्त्वाद्य उभयकर्मज
ः परः ११९ विभागजस्तृतीयः स्यात्तृतीयोपि द्विधा भवेत् हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः १२० परत्वं चापरत्वं च द्वितीयं परिकी

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

का· का· व्या· र्तितम् दैशिकं कालिकं चापि मूर्त एव तु दैशिकम् १२१ परत्वं सूर्यसंयोगभूयस्त्वज्ञानतो भवेत् अपरत्वं तदल्पत्वबुद्धितः स्यादितीरि
तम् १२२ तयोरसमवायि स्याद्दिक्संयोगस्तदाश्रये दिवाकरपरिस्पन्दभूयस्त्वज्ञानतो भवेत् १२३ परत्वमपरत्वं तु तदीयाल्पत्व
बुद्धितः अत्र त्वसमवायी स्यात्संयोगः कालपिण्डयोः १२४ अपेक्षाबुद्धिनाशेन नाशस्तेषामुदाहृतः बुद्धेः प्रपंचः प्राग
व प्रायशो विनिरूपितः १२५ अथापि विशिष्टबोध्य परिष्कारः प्रकारः परिदृश्यते अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते १२६
तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता तत्प्रपंचो विपर्यासः संशयोऽपि प्रकीर्तितः १२७ आद्यो देहे ह्यात्मबुद्धिः शंखादौ पी
ततामतिः भवेन्निश्चयरूपा या संशयोऽथ प्रदर्श्यते १२८ किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः तदभावाप्रकारा धीस्तत्प्रका

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

स्तुनिश्चयः १२९ संशयोमितिर्यास्यादेकत्राभावभावयोः साधारणादिधर्मस्यज्ञानंसंशयकारणम् १३० दोषोप्रमायाजनकःप्रमायास्तु
गुणोभवेत् पित्तदूरत्वादिरूपोदोषोनानाविधोमतः १३१ प्रत्यक्षेतुविशेष्येणविशेषणवतासमम् सन्निकर्षोगुणस्तुस्यादथत्वनु
मितौपुनः १३२ पक्षेसाध्यविशिष्टेतुपरामर्शोगुणोभवेत् शक्येसादृश्यबुद्धिस्तुभवेदुपमितौगुणः १३३ शाब्दबोधेयोग्यतायाः
स्तात्पर्यस्यापिवाप्रमागुणःस्याद्भ्रमभिन्नंतुज्ञानमात्रमथप्रमा १३४ अथवातत्प्रकारंयद्ज्ञानंतद्वद्विशेष्यकम् तत्प्रमानप्रमा
नापिभ्रमःस्यान्निर्विकल्पकम् १३५ प्रकारतादिशून्यंहिसंबन्धानवगाहितत् प्रमात्वंनस्वतोग्राह्यंसंशयानुपपत्तितः १३६
अभिचारस्याग्रहोपिसहचारग्रहस्तथा हेतुर्व्याप्तिग्रहेतर्कःक्वचिच्छंकानिवर्तकः १३७ साध्यस्यव्यापकोयस्तुहेतोरव्यापक

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

का॰ का॰ व्याप्त्यासत्त्वा सदुपाधिर्भवेत्तस्य निष्कर्षोऽपपद्यते १३८ सर्वे साध्यसमानाधिकरणाः स्युरुपाधयः हेतोरेकाश्रये येषां स्वसाध्यव्यभिचा
रिता १३९ व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम् शब्दोपमानयोर्नैव पृथक्प्रमाणमिष्यते १४० अनुमानगतार्थत्वादि
ति वैशेषिकं मतम् तन्न सम्यग्विना व्याप्तिबोधं शाब्दादिबोधतः १४१ द्विविधं तु भवेद्व्याप्तिरन्वयव्यतिरेकतः अन्वयव्याप्तिरुक्तैव
व्यतिरेकादथोच्यते १४२ साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते १४३ व्य
तिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः सुखं तु जगतामेव काम्यं धर्मेण जन्यते १४४ अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचे
तसाम् निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते १४५ इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि चिकीर्षा कृतिसाध्यत्व

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

कारेस्त्रातया भवेत् १४६ तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् बलवद्द्विष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका १४७ तद्धेतुत्व
बुद्धेस्तु हेतुत्वे कस्यचिन्मते द्विष्टसाधनबुद्धिस्तु भवेद्द्वेषस्य कारणम् १४८ प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् एवं
प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्तितम् १४९ चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं
भवेत् १५० निवृत्तिस्तु भवेद्द्वेषाद्द्विष्टसाधनताधियः यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत् १५१ शरीरे प्राणसंचारका
रणं तत्प्रकीर्तितम् अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तु तत् १५२ अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् १५३ तदेवा
समवायि स्यात्पतनाख्येषु कर्मसु सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमुदाहृतम् १५४ सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

का॰ का॰ ना॰ परमाणौ जले नित्यमन्यत्रानित्यमुच्यते १५४ नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तत् १५५ स्ने
हो जले स नित्योऽणावनित्योऽवयविन्यसौ तैलान्तरे तत्प्रकर्षाद्दहनस्यानुकूलता १५७ संस्कारभेदो वेगोऽथ स्थितिस्थापकभावनाः मू
र्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित् १५८ स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देऽपि कारणं
१५९ भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् १६० स्मरणे प्रत्यभिज्ञायामप्यसौ
हेतुरुच्यते धर्माधर्मावदृष्टं स्याद्धर्मः स्वर्गादिसाधनम् १६१ गंगास्नानादियागादिव्यापारः स तु कीर्तितः कर्मनाशाजलस्पर्शादिना
नाश्यस्त्वसौ मतः १६२ अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः प्रायश्चित्तादिनाश्योऽसौ जीववृत्तिरिमौ गुणौ १६३ इमौ तु वासनाज

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

का॰का॰न्या॰ स्योत्था नादपि वितन्यत शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः १६४ कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः सर्वः शब्दो नभोवृ
त्तिः श्रोत्रोत्पन्नस्तु गृह्यते १६५ वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता १६६ कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते उत्पन्नः कोवि
नष्टः क इति बुद्धेरनित्यता १६७ सोयं क इति बुद्धिस्तु साजात्यमवलम्बते तदेवौषधमित्यादौ सजातीयेपि दर्शनात् १६८ इतिश्री
विश्वनाथपञ्चाननभट्टाचार्यविरचितो भाषापरिच्छेदः समाप्तः शुभमस्तु पातु हरिरोनन्तसत् ब्रह्मणे नमः मंगलं भगवान्विष्णुं मंगलं
गरुडध्वजः मंगलं पुण्डरीकाक्षः मंगलायतनो हरिः [redacted]

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

पत्रे ११

CC-0 Dharmartha Trust J&K. An eGangotri Initiative